शास्त्री I  अनिवार्यपत्रम् ।  30-04-2021

साहित्य आनर्स, व्याकरणेतर— पारिभाषिक शब्दाः ।

1. टि → "अचोऽन्त्यादि टि ।" "शकन्ध्वादिषु पररूपं वाच्यम् ।"
अचां मध्ये योऽन्त्यः स आदिर्यस्य तट्टिसंज्ञं स्यात् ।
शकन्ध्वादिगणे पठितेषु शब्देषु पररूपएकादेशः 'टि' स्थाने स्यात् । यथा → शकन्धु, कर्कन्धुः, कुलटा, मनीषा आदि।
शकन्धुः → शक + अन्धुः । अकः सवर्णे दीर्घः सूत्रस्य बाधः। शक इत्यस्य ककारोत्तरवर्ती अकारः 'टि' संज्ञकः, अकारस्य पररूपं भूत्वा शकन्धुः ।

इन्द्रः अस्मिन् पदे एकारोत्तरवर्ती अकारः टि संज्ञकः ।

'मनीषा' → मनस् + ईषा, अत्र मनस् इत्यस्य 'अस्' भागस्य टि संज्ञा, पररूपकार्यं भूत्वा मन् + ईषा = मनीषा ।

2. यण् → यण् प्रत्याहारः अस्ति। अस्मिन् प्रत्याहारे य्, व्, र्, ल् वर्णानि सन्ति ।

3. वृद्धिः → "वृद्धिरादैच् ।" वृद्धिः आत् ऐच् ।
आ, ऐ, औ वर्णानां वृद्धिः संज्ञा भवति ।
यथा → गङ्गा + ओघः = गङ्गौघः, वृद्धिरेचि सूत्रेण ।

4. गुण → "आद्गुणः ।" "अदेङ्गुणः ।"
अ, ए, ओ वर्णानां गुण संज्ञा भवति ।
ह्रस्व अकारस्य, दीर्घ एकारस्य, दीर्घ ओकारस्यैव गुण संज्ञा भवति। यथा → उप + इन्द्रः = उपेन्द्रः ।
अत्र (अ तथा इ स्थाने) पूर्वपरयोः एकः गुणादेशः 'ए' ।

5. प्रातिपदिकम् → नियतोपस्थितिकः। शब्दस्य मूलरूपम्। निश्चितार्थं प्रदातुं समर्थः शब्दः।
① "अर्थवदधातुरप्रत्ययः प्रातिपदिकम् ।" "कृत्तद्धित समासाश्च ।"
धातुभिन्नस्य, प्रत्ययभिन्नस्य, प्रत्ययान्तभिन्नस्य च अर्थवान् शब्दस्य प्रातिपदिक संज्ञा भवति। यथा → राम, एषः शब्दः सार्थकः अस्ति। अर्थं न तु धातुः, न प्रत्ययः न च प्रत्ययान्तः। अतएव अस्य प्रातिपदिक संज्ञा। कृदन्तस्य, तद्धितान्तस्य तथा समासस्यापि प्रातिपदिकसंज्ञा भवति। यथा - पाचक, कारक, औपगव, राजपुरुष आदि।

30-04-2021

डॉ० निर्मल कुमार झा, स० प्राचार्य
राधा-उमाकान्त सं० महावि० सुखसेना, पूर्णियाँ

30-04-2021

अनिवार्यपत्रम् । शास्त्री- II

व्याकरण के छात्र हेतु, साहित्यम् । रघुवंशम् । श्लोकव्याख्या ।

"नेत्रव्रजाः पौरजनस्य तस्मिन्विहाय सर्वान्नृपतीन्निपेतुः ।
मदोत्कटे रेचितपुष्पवृक्षा गन्धद्विपे वन्य इव द्विरेफाः ॥"

श्लोकोऽयं महाकविकालिदासविरचितस्य रघुवंशमहाकाव्यस्य षष्ठसर्गादिन्दुमतीस्वयंवरकथावर्णनाद् उद्धृतोऽस्ति ।

कविरत्र स्वयंवरे समुपस्थितानां जनानाम् आकर्षण-केन्द्रभूतस्य अजस्य सर्वोत्कर्षत्वं दर्शयति ।
पुष्पितान् वृक्षान् विहाय गजमदे यथा भ्रमराः पतन्ति तथैव विदर्भनारिकाणां लोचनानि सर्वान् नृपतीन् परित्यज्य तस्मिन्नेव अजे समाकृष्टानि ।

अन्वयः → पौरजनस्य नेत्रव्रजाः सर्वान् नृपतीन् विहाय रेचितपुष्पवृक्षाः द्विरेफाः मदोत्कटे वन्ये गन्धद्विपे इव तस्मिन् निपेतुः ।

शब्दार्थः व्याकरणञ्च → पौरजनस्य = विदर्भनिवासिनः ।
नेत्रव्रजाः = नयनानि । सर्वान् = समस्तान् । विहाय = त्यक्त्वा ।
रेचितपुष्पवृक्षाः = परित्यक्तसुमनतरवः । द्विरेफा = मधुपाः ।
मदोत्कटे = मदोद्भिन्नगण्डनिर्भरमदे । वन्ये = जाङ्गलिके ।
गन्धद्विपे = गन्धप्रमुखे गजे । निपेतुः = निपतिताः ।
पौरजनस्य → पुरे भवाः पौराः, पौराणां जनः पौरजनः, तस्य ।
मदोत्कटे → मदेन उत्कटः, तस्मिन् । रेचितपुष्पवृक्षाः → रेचिताः पुष्पाणां वृक्षाः यैः ते । द्विरेफाः → द्वौ रेफौ येषाम् ते ।

अस्मिन् श्लोके वैदर्भीरीतिः, प्रसादगुणः, उपमालङ्कारः, उपजातिछन्दश्च ।

30-04-2021

डॉ० निर्मलकुमार झा, (स० प्राचार्य)
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ ।

शास्त्री III

30-04-2021

साहित्यप्रतिष्ठा । अष्टमं पत्रम् । मालविकाग्निमित्रम् । श्लोकव्याख्या ।

"लब्धास्पदोऽस्मीति विवादभीरोस्तितिक्षमाणस्य परेण निन्दाम् ।
यस्यागमः केवलजीविकायै तं ज्ञानपण्यं वणिजं वदन्ति ॥"

कालिदासरचितस्य मालविकाग्निमित्रस्य प्रथमाङ्कात् उद्धृतोऽयं श्लोकः गणदासस्य नाट्याचार्यस्य यत्नोक्तिः ।

अन्वयः → लब्धास्पदः अस्मि इति विवादभीरोः परेण निन्दां तितिक्षमाणस्य यस्य आगमः केवलजीविकायै तं ज्ञानपण्यं वणिजं वदन्ति ।

शब्दार्थाः व्याकरणञ्च → लब्धास्पदः अस्मि = प्राप्तस्थानः अस्मि । लब्धम् आस्पदं येन सः ।
इति = अस्मात्कारणात् । विवादभीरोः = शास्त्रार्थभीतस्य ।
विवादात् भीरुः विवादभीरुः, तस्य विवादभीरोः । परेण = अन्येन ।
निन्दाम् = अनादरम् । तितिक्षमाणस्य = क्षमाशीलस्य ।
यस्य आगमः = यस्य पाण्डित्यम् । केवलजीविकायै = स्वपालनमात्रफलाय । तं ज्ञानपण्यं = तं शास्त्रविक्रेतारं ।
वणिजम् = व्यापारिणम् । वदन्ति = कथयन्ति ।
ज्ञानपण्यम् = ज्ञानं यव पण्यं यस्य स, तम् ।
अस्मिन् श्लोके परम्परित रूपकालङ्कारः उपजातिर्वृत्तम् च ।

30-04-21

डॉ० निर्मल कुमार झा, स० प्राचार्य ।
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ ।

30-04-2021

उपशास्त्री

अनिवार्य प्रथमपत्रम् ।

संस्कृतानुवाद: →

संस्कृत व्याकरण में धातु (क्रिया का मूल रूप, यथा गच्छति क्रियापद का मूल रूप [गम् धातु]) को दस लकारों में विभक्त किया गया है। प्रत्येक लकार 'काल' यानि 'समय' या 'कथन-विधि' का बोधक होता है ये दस लकार हैं→ लट् (वर्तमानकाल), लोट् (आज्ञार्थक) लृट् (भविष्यत् काल), विधिलिङ् (विधि, चाहिए), लङ् (भूतकाल), लिट् (परोक्ष भूतकाल), लुट् (आसन्न या अनद्यतन भविष्यत् काल), लेट् (आशीर्लिङ्ग) लृङ् (हेतुहेतुमद्भूत), लुङ् (साधारण भूतकाल)

इन दस कालों के बोधक शब्दों का प्रथम वर्ण 'ल' से प्रारंभ होता है। इसी लक्षण के चलते इन्हें 'लकार' कहा गया।

छात्र इन दस लकारों में से पाँच (लट्, लृट्, लोट्, लङ्, विधिलिङ्ग) लकारों में धातु रूप अवश्य याद रखें तो संस्कृतानुवाद - संवाद सरल हो जाएँगे। विस्तृत ज्ञान के लिए दसों लकारों का अध्ययन करें। विभिन्न लकारों में धातुरूप-परिवर्तन के कारण धातुओं को दस भागों में बाँटा गया है। प्रत्येक भाग को गण कहा जाता है। धातुओं के दस गण ये हैं→ भ्वादि, अदादि, ह्वादि या जुहोत्यादि, दिवादि, स्वादि, तुदादि, तनादि, रुधादि, क्रयादि तथा चुरादि।

शेष अगली कक्षा में।

(हस्ताक्षर) 30-04-21

डॉ० निर्मलकुमार झा, एक प्राचार्य।
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ।